# Sampurn Swasti Vachan Mantra

ॐ आनोभद्रा: क्रतवो यन्तु विस्वतो
दब्धासो अपरीतास उद्भिद:।

देवानो यथा सदमिद वृधे
असन्नप्रायुवो रक्षितारो दिवे दिवे।।

देवानां भद्रा सुमतिर्रिजुयताम देवाना
ग्वंग रातिरभि नो निवार्तताम।

देवानां ग्वंग सख्यमुपसेदिमा वयम
देवान आयु: प्रतिरन्तु जीवसे।।

तान पूर्वया निविदा हूमहे वयम
भगं मित्र मदितिम दक्षमस्रिधम।

अर्यमणं वरुण ग्वंग सोममस्विना
सरस्वती न: सुभगा मयस्करत ।।

तन्नोवातो मयोभूवातु भेषजं
तन्नमाता पृथिवी तत्पिता द्यौ: ।

तद्ग्रावान: सोमसुतो मयोभूवस्त
दस्विना श्रुनुतं धिष्ण्या युवं ।।

तमीशानं जगतस्तस्थुखसपतिं
धियंजिन्वमवसे हूमहे वयम ।

eAstroHelp
Your Astrology Helpline

पूषा नो यथा वेद सामसद वृधे
रक्षिता पायुरदब्धः स्वस्तये ।।

स्वस्ति न इन्द्रो वृद्ध श्रवाः
स्वस्ति न पूषा विस्ववेदाः ।

स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः
स्वस्ति नो वृहस्पति दधातु।।

पृषदश्वा मरुतः प्रिश्निमातरः
शुभं यावानो विदथेषु जग्मयः।

अग्निजिह्वा मनवः सूरचक्षसो
विश्वे नो देवा अवसागमन्निह।।

भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवा ग्वंग सस्तनू
भिर्व्यशेमहि देवहितं यदायुः।।

शतमिन्नु शरदो अन्ति देवा
यत्रा नश्चक्रा जरसं तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति
मानो मध्या रीरिषतायुर्गन्तोः।।

अदितिर्द्यौरदितिरन्तरिक्षम
दितिर्माता स पिता स पुत्रः।

विश्वेदेवा अदितिः पञ्चजना

eAstroHelp
Your Astrology Helpline

अदितिर्जातमदितिर्जनित्वम् ।।

द्यौ: शान्ति रन्तरिक्ष् ग्वंग शान्ति: पृथिवी
शान्ति राप: शान्ति रोषधय: शान्ति:।

वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म
शान्ति: सर्व ग्वंग शान्ति: शान्तिरेव
शान्ति: सामा शान्तिरेधि।।

यतो यत: समीहसे ततो नो अभयं कुरु ।
शं न: कुरु प्रजाभ्यो भयं न: पशुभ्य: ।।

सुशान्तिर्भवतु

श्री मन्महागणाधिपतये नमः।
लक्ष्मीनारायणाभ्यां नम:।
उमामहेश्वराभ्यां नम:।
वाणीहिरण्यगर्भाभ्यां नं:।

शचिपुरन्दराभ्यां नम:।
इष्टदेवताभ्यो नम:।
कुलदेवताभ्यो नम:।
ग्रामदेवताभ्यो नम:।
वास्तुदेवताभ्यो नम:।
स्थानदेवताभ्यो नम:।
सर्वेभ्यो देवेभ्यो नम:।
सर्वेभ्यो ब्राह्मणेभ्यो नम:।

: ।

eAstroHelp
Your Astrology Helpline

ॐ सिद्धिबुद्धिसहिताय श्री मन्महागणाधिपतये नमः।

सुमुखश्चैकदन्तश्च
कपिलो गजकर्णकः।
लम्बोदरश्च विकटो
विघ्ननाशो विनायकः।।

धूम्रकेतुर्गणाध्यक्षो
भालचन्द्रो गजाननः।
द्वद्शैतानि नामानि
यः पठे च्छ्रिणुयादपी।।

विद्यारंभे विवाहे च
प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव
विघ्नस्तस्य न जायते।।

शुक्लाम्बरधरं देवं
शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्
सर्व्विघ्नोपशान्तये।।

अभिप्सितार्थ सिद्ध्यर्थं
पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै
गणाधिपतये नमः।।

eAstroHelp
Your Astrology Helpline

सर्वमङ्गलमाङ्गल्ये !
शिवे ! सर्वार्थसाधिके।
शरण्ये त्र्यम्बिके !
गौरी नारायणि नमोस्तुते।।

सर्वदा सर्वकार्येषु
नास्ति तेषाममङ्गलम्।
येषां हृदयस्थो भगवान्
मङ्गलायतनो हरि:।।

तदेव लग्नं सुदिनं तदेव,
ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव,
लक्ष्मीपते तेन्घ्रियुगं स्मरामि।।

लाभस्तेषां जयस्तेषां
कुतस्तेषां पराजय:।
येषामिन्दीवरश्यामो
हृदयस्थो जनार्दन:।।

यत्र योगेश्वर: कृष्णो
यत्र पार्थो धनुर्धर:।
तत्र श्रीर्विजयो भूति
र्ध्रुवा नीतिर्मतिर्मम।।

अनन्यास्चिन्तयन्तो मां
ये जना: पर्युपासते।
तेषां नित्याभियुक्तानां
योगक्षेमं वहाम्यहम्।।

eAstroHelp
Your Astrology Helpline

स्मृते:सकल कल्याणं
भाजनं यत्र जायते।
पुरुषं तमजं नित्यं
व्रजामि शरणं हरम्।।

सर्वेष्वारंभ कार्येषु
त्रय:स्त्री भुवनेश्वरा:।
देवा दिशन्तु नः सिद्धिं
ब्रह्मेशानजनार्दना:।।

विश्वेशम् माधवं दुन्धिं
दण्डपाणिं च भैरवम्।
वन्दे कशी गुहां गंगा
भवानीं मणिकर्णिकाम्।।

वक्रतुण्ड् महाकाय
सूर्य कोटि समप्रभ।
निर्विघ्नं कुरु में देव
सर्वकार्येषु सर्वदा।।

**ॐ श्री गणेशाम्बिका भ्यां नम**

eAstroHelp
Your Astrology Helpline